Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 1 | ISSN : 2581- 6306

# ज्योतिषशास्त्रप्रयोजन-विमर्शः



**डॉ० व्रजेश कुमार मिश्रः**
**पितुर्नाम- डॉ. कालीकान्त मिश्रः**
**ग्रामः- तुमौल, पत्रालयः- पुतइ**
**मण्डलम्- दरभंगा, भारत।**

**सारांश**– ''ज्योतिषाययनं चक्षुरिति'' पाणिनीय– शिक्षायां ज्योतिषशास्त्रस्य प्रयोजनं प्रतिपादितं विद्यते। ज्योतिषं प्रत्यक्षं वैज्ञानिकञ्च शास्त्रं लोकोपकारको विद्यते। ज्योतिषाशास्त्रस्य महत्त्वं सर्वैः स्वीक्रियन्ते।

**प्रमुख शब्दाः** – वैदिकवाङ्मयः, चक्षुः, वेदपुरुषः, ज्योतिषशास्त्रम्, धर्ममूलम्, पितामहः, श्री जन्मपत्री, ज्योतिर्विदः।

---

धर्मप्रधानभारतवर्षस्य आर्याणं सनातनस्य धर्मस्य मूलं परमेश्वरस्य परम–पावन वैदिकवाङ्मयः सुप्रतिष्ठितः विद्यते। वैदिको धर्मश्चैहिकं सर्वं कल्याणायोपलब्धये यज्ञानामनुष्ठानादि कर्तव्यसुपरिनिष्ठतं विद्यते। यज्ञाश्च तावत् कालविशेषेषु अनुष्ठेयता सन्ति समाम्नाताः। अतएव कालक्रमेण भारतीये संस्कृतक्षेत्रे श्रोतमिति प्रतिष्ठितस्य पौराणिकस्य धर्मस्य कालक्रमेण भारतीयेसंस्कृतक्षेत्रे श्रौतमिति प्रतिष्ठितस्य पौराणिकस्य धर्मस्य प्रसारेण वर्षमासतिथि दिवसनक्षत्रादि सम्पातभेदेन वैविध्यमुपेतानां ब्रतोपवासस्नाननदानादीनां कृत्यानां संस्काराणाञ्च संगलावहानां धर्मशास्त्रोदितानां विधीनां कर्तव्यता परं श्रेयस्कर विलोक्यते। एतत्सर्वं विधमपिकृत्यजातं कालविशेष प्रतिष्ठितमेवेति तज्ज्ञानाय ज्योतिषं नाम कालविधानशास्त्रं वेदपुरूषस्य नेत्रस्थानीयत्वेनाचार्यैः परिगणितमुपलम्यते।

यथा कथितं शास्त्रान्तरे–

**वेदस्य निर्मलं पक्षुः ज्योतिषशास्त्रमकल्मषम्।**
**विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति।।1**

**कालविधानशास्त्रविषये लगधऋषिणोक्तमेतादृशम्-**

**वेदाहि यज्ञार्थममिप्रवृत्ताः**
**कालानुपूर्या विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशस्त्रम्।**
**यो ज्योतिषं वेद सवेदयज्ञान्।।2**

**कालविधानशास्त्रविषये भगवतः श्रीकृष्णस्थवचनमेतादृशम्-**

**अव्यक्तात् व्यक्तयः सर्व प्रभवन्त्यहरागमे।**
**रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्त संज्ञके।।3**

सर्वशक्तिमान् परमात्मना त्रिकालज्ञैमहर्षिभिश्च सृष्ट्यादौ एव प्राणीनां हितकामनया प्रकाशितः।

मुनना यथोक्तम्–

**वेदोऽखिलो धर्ममूलें स्मृतिशीले च तद्विदम्।**

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।[4]**

मीमांसायां एतस्य प्रामाणिकं वचनम्। यथा–

**श्रेयः साधनता ह्येषा नित्यंवेदात्प्रतीयते।**

**तादूप्येण च धर्मत्वं तस्मान्नेनिद्रयगोचरः।।[5]**

अपि च– **प्रत्यक्षेनानुमित्या वा यस्तूपायो न बुध्यते।**

**एवं विन्दन्ति वेदेन तस्माद् वेदस्य वेदता।।[6]**

अस्य ज्योतिषाशास्त्रस्य व्याकरणादीनां षडङ्गानि सन्ति–मुखं व्याकरणं, ज्योतिषं नेत्रं, निरूक्तं कर्णं, कल्पः हस्तः, शिक्षानासिकाछन्दः पादश्चेति।

विषयेऽस्मिन् भास्कराचार्यस्य वचनमेतादृशम्–

**शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी**

**श्रोत्रमुक्तं निरूक्तं च कल्पः करौ।**

**यातु शिक्षाऽस्य वेदस्य सा नासिका**

**पादपद्मद्वयं छन्द आद्यैर्बुधैः।।[7]**

वेदपुरूषस्य नेत्रत्वात् ज्योतिषशास्त्रं सर्वेस्वंगेषूत्तमं परिगण्यते। यतः सर्वैरंगैर्भूपितोऽपि प्राणी नेत्रविहीनत्वात् न किंचित्करः भवति।

विषयेऽस्मिन् भास्कराचार्यस्य वचनम्। यथा–

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं**

**मुख्यता चांगमध्येऽस्य तेनोच्यते।**

**संयुतोऽपीतरैः कर्णनासादिमिः**

**चक्षुषांगेन हीनेन किञ्चत्करः।।[8]**

कश्यपमतानुसारेण शस्त्रस्यास्य अष्टादश आचार्याः सन्ति। ते च–

**सूर्यः पितामहो व्यासो विशिष्ठोऽत्रि पराशरः।**

**कश्यपो नारदो गर्गो मरीचीर्मनुरंगिराः।।**

**लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**

**शैनकोऽष्टादशश्चैते ज्योतिः शास्त्रप्रवर्तकाः।।[9]**

किन्तु पराशरमतानुसारेण एकोनविंशतिः ज्योतिषशास्त्रस्य प्रवक्तारः सन्ति। यथा–

**विश्वसृड नारदो व्यासो वशिष्ठोऽत्रि पराशरः।**

**लोमशो यवनः सूर्यश्च्यवनः कश्यपो मृगुः।।**

अस्माकं पूर्वकालिक–युगः विश्वपसस्य आस्थायाश्चासीत्। कारणादस्मात् विदुषां महर्षीणाञ्च वचनं जनसाधारणोऽपि ब्रह्मवाक्यमिव मन्यते स्म। विज्ञानस्याधुनिके युगेऽस्मिन् प्रत्येकं विषयोपरि तर्कं क्रियते। **"यत्तर्केणानुसन्धते सधर्म वेद नेतरः''** तर्केण यस्य विषयस्य प्रतिपादनं भवति सैव धर्मः, सैव सत्यं शेषं सर्वं मिथ्याडम्बरं जातम्। प्रकार्यपि ज्योतिषविज्ञानोप आक्षेपं कुर्वन्ति जना, ते सर्वे निर्मूलासन्ति। ज्योतिशास्त्रस्य पदे–पदे प्रयोजनं सिद्धं जातं यतः **"विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति''** नारदवचनात् परिपुष्टं भवति।

भूयो–भूयो प्रश्नं पृच्छत यत् गगनचाराणां ग्रहाणां मानवजीवनोपरि कथं प्रभावं भवति एषां जड़तत्वानां भूलोकस्थानां जनानां जीवनोपरि कथं सूक्ष्मं प्रभावं भवति? **"जातमुत्तरं भवत्येव यद् पिण्डे सैव ब्रह्माण्डे''** वचनात्।

पुरतः प्रश्नं समायाति यत् किं भाग्यं? भाग्यं नास्ति कश्चिद् स्वयम्भूतः अपितु पूर्वजन्मनि शुभाशुभकर्मणः पंक्तिः। पूर्वजन्मनि यद् शुभाशुभं कर्मं क्रियते तदेवास्माकं भाग्यम्। अस्माकं भारतीयसंस्कृतिः पूर्वजन्म मन्यते। अस्माकं जनमपत्री कृतं शुभाशुभकर्मद्योतकम्। विषयेऽस्मिन् जातकस्य पुरोधा वराहमिहिरस्य वचनं प्रशंसनीयम्। यथा–

**यदुपचितमनयजनमाने,**

**शुभाशुभं तस्य कर्मणः पंक्तिन्।**

**व्यञ्जयति शास्त्रमेतत्**

**तमासि द्रव्याणि दीप मिव।।**[10]

गतजन्मनि यद् शुभाशुभं कर्मं, तस्य किं फलं भविष्यति, कदा भविष्यति, सर्वेषां समाधनम् अस्माकं ज्योतिषशास्त्रं करोति, यथा एकं दीपं गहनान्धकारेऽपि सर्वानि वस्तुनि प्रकाशयन्ति। ग्रहस्थित्यवगम्य पूर्वंजन्मकर्मं ज्ञातं जातम्।

जन्मसमयस्य ग्रहस्थित्या अस्माकं कर्मं तथैव स्पष्टं भवति यथा दर्पणे।

**साक्षत्भवेद्भाग्य निरीक्षणाय,**

**लसुनिर्मला दर्शतले किलेदम्।।**[11]

यदि कश्चिद् ज्योतिर्विदः भवन्तं कथयति यत् भवतः जीवने, भवदीयभाग्ये स्त्रीसुखं नास्ति, यद्यस्ति अल्पमेव। ज्योतिषभाषायां अस्याभिप्रायमिदमेव भवति यत् गतजन्मनि स्त्रीहत्या कृता। कारणादस्मात् भाग्यनिरीक्षकं ज्योतिषं एतादृशं फलं निगदति। कुष्ठरोगे सति गतजन्मनि कन्याहत्या सूचकः। भाग्य निर्माता स्वयमेव मानवः भवति। भूत–भविष्य–वर्तमानकालानां ज्योतिषशास्त्रं शुभाशुभयोः फलसूचकं विद्यते। अस्माकं जीवने शास्त्रस्यास्य प्रयोजनं वरिवर्ति।

भाग्यस्य निर्देशकत्वादेव ज्योतिषशास्त्रस्य प्रयोजनं भवत्येव। **"ग्रहाधीनं जगत्सर्वं''** **"ग्रहाः देवतांशका''** च वचनरसात् प्रयोजनं प्रत्यक्षमेव। कथितमपि–

**अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलम्।**

**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।।**[12]

**शास्त्रस्यास्य प्रयोजनविषये बराहस्योक्तिर्यथा-**

**न तथेच्छति भूपते पिता जननी वा जनकोऽथवा सुहृत्।।**[13]

यावन्तं सहाय्यं मानवजीवने ज्योतिषविज्ञानात् प्राप्तं भवति न तथा पिता, जननी, भ्राता च करोति।–

**अपि च-**

**अर्थाजने सहायं पुरूषाणा मापदर्णवे पोतः।**

**यात्रा समये मन्त्री, जातकमपहाय नास्त्यपरः।**[14]

धनार्जने सहायकं अर्थकारी विद्या, आपद्समुद्रात् पारियतुं पोतः। यात्रायां मन्त्री रूपेण सहायकं, शस्त्रस्यातिरिक्तं को न कोऽपि सहायकं भवितुमर्हति।।

**"अवश्यं भाविनो भावी''** सत्यकथनानुसारेण किमर्थं ज्ञातव्यमिति यतः या घटना घटितयोग्या घटितव्यत्येव। अत्र इदमेव विचारणीयं भवति यत् एतादृशी घटना कदा घटिष्यति ज्ञानं अस्माकं जीवने परमावश्यकं विद्यते।

**अस्माकं भग्योदयं कदा भविष्यति?**

**स्त्रीमुखं सन्तानसुखञ्च अस्ति न वा?**

**जीविका कदा भविष्यति?**

**भूमि-भवन-वाहनादि लाभं भविष्यति न वा?**

**जीवने विद्या-लाभं अस्ति न वा।**

एतेषां कतिपयेषां प्रश्नानां समाधानं अस्माकं ज्योतिषशास्त्रं विद्धाति। संचितानां शुभाशुभकर्माणां फलोदयं कदा पतिष्यतीति विषये पुरूषार्थस्यापि जीवने नितानत आवश्यकं प्रतिभति।

**"नहि सुप्तस्य सिंहस्य प्रविसनित मुखे मृगाः"।**

एवञ्च भाग्य– पुरूषार्थयोर्सहमिलनमावश्यकं विद्यते। घटि पुरूषार्थं विनैव फलमश्नुते मानवः तदा कथं कृषकाः कृषिकर्मणि उद्यता भविष्यन्ति।

विषयमधिकृत्य वचनमेतादृशमवलोकनीयं यथ–

**तथाह्येकेन चक्रेन, न रथस्य गतिर्भवेत्।**

**एवं पुरूषकारेण, विना दैवं न सिद्ध्यति।।**[15]

जीवन– रथस्य कृते भाग्यं पुरूषार्थञ्च नामकं चक्रद्वयम् परमावश्यकं विद्यते। यथा एकेन चक्रेन रथस्य गतिर्सिद्धः न भवति तथैव पुरूषार्थं विना भाग्यमपि न किमपि कर्तुं शक्यते। एतयोदर्वयोः विचारं ज्योतिषशास्त्रादेव संभवं, नास्त्यपरः ।

कस्मिन्–कस्मिन् समये सतर्कता आवश्यकं भवति ज्ञानार्थ ज्योतिषशास्त्रं जन्मपत्रञ्च परमावश्यकं प्रतिभाति।

कथितमपि– **श्रीजन्मपत्री शुभदीपकेन**

**व्यक्तं भवेद्भावि फलं समस्मं।**

**क्षमा प्रदीपेन यथालयस्थं**

**घटादिजातं प्रकटीत्वमें तीणो ।।**[16]

जन्मकुण्डलीमध्यमेन अस्माकं सम्पूर्णं जीवनं प्रकाशितं भवति। तथा अनया– जन्मपत्र्या सम्पूर्णजीवनं स्पष्टं जातं यथा– रात्रौ गहनान्धकारे दीपकेन समस्तं वस्तुं प्रकाशितं स्पष्टञ्च जातम्।

इदमपिवचनं सत्यमेव। यथा–

**यस्य नास्ति खलु जन्मपत्रिका,**

**या शुभाशुभफलप्रदायिनी।**

**अन्धकं भवति तस्य जीवनम्,**

**दीपहीनमिव मन्दिरं निशि।।**[17]

**सन्दर्भाः-**

1. नारसंहिता संकलितम् (कृष्णदत्त झा) पृं.सं.2–31
2. यजुर्वेद ज्योतिव॰ श्लो. – 31
3. गीता– 8.18
4 मनुस्मृति– 2.6
5. श्लोकवार्तिक– प्रतिज्ञा सू॰ श्लो. –7
6. ऽग्भाष्य भूमिका सायंकाष्यम्।
7. सिद्धा॰ शि॰ क॰ मा॰ अ॰ श्लो॰– 10
8. तथैव, श्लोक– 11
9. गणकतत्गि, पृ॰–1
10. लघुजातक अ॰ 1 श्लो–3
11. तत्रैव।
12. संकलितम्।
13. लघुजातकम्– 1/5
14. सारावली– 2/5
15. संकलि॰ नवनी पृ॰ –26
16. मानसागरी अ॰ 1 श्लो॰ 21
17. मानसागरी अ॰ 1 श्लो॰ 12